# রচনাধর্মী প্রশ্নোত্তর (সংস্কৃত ভাষায়)

## १. शुकनासोपदेशेन राजलक्ष्म्याः यत् चरित्रं प्राप्यते तत् प्रतिपाद्यताम्।

Or

## लक्ष्म्यानुगृहीतानां राज्ञां दुरावस्थां वर्णयतु।

Or

## शुकनासानुसारं लक्ष्मीचञ्चलतां विश्लेषयतु।

*कादम्बरी सहोदर्या सुधया वैवुधे हृदि।*
*हर्षाख्यायिकया ख्यातिः वाणोऽब्धिरिव लब्धवान्।।*

संस्कृतसाहित्यसरसि येन विकशितेन इन्दिवरेण गद्यकाव्यसमीरणः सुरभीयते, यमाघ्राय सहृदयस्य हृदये प्रशान्तिः जायते स एव चित्रभानु-राज्यदेव्याः सुपुत्रः वाणभट्टः। तस्य सृष्ट्याकाशे कादम्बरी ध्रुवतारा सदृशा। काव्यमिदं कथाकाव्यरूपेण बुधैः चिह्णितम्। काव्यस्यास्य शुकनासोपदेशः इति आख्यानभागे राज्याभिषेकस्य प्राक्काले उज्जयिनीश्वरस्य तारापीडस्य महामात्यः शुकनासः तारापीडपुत्रं चन्द्रापीडमुपदेशयति। तत्र राजलक्ष्म्याः चरित्रं सुचारुरूपेणाङ्कितं शुकनासेन।

अघटनपटीयसी खलु लक्ष्मीरियम्। वीर्यलभ्यापि भ्रमरीवत् नृपात् नृपान्तरं सदैव गच्छति। धर्म-निपुणता-विद्या-सत्य-कुलञ्च त्यक्त्वा सा अन्यत्रैति – **न परिचयं रक्षति, नाभिजनमीक्षते** ...। मन्थनवेलायां क्षीरसागरादुत्थिता चिरं तत्र एकत्र सहवासात् पारिजातपल्लवेभ्यः जनानुरक्तिरूपं रागं, चन्द्रलेखायाः वक्रतारूपकुटिलतां, कालकुटवत् मत्तताजननशाक्तिं, मदिरायाः मदरूपमौद्धत्यं गृह्णाति इयं लक्ष्मीः।

स्वभावलोलायाः परिचयसौहार्द्यरहितायाश्च अस्याः सदृशी नास्ति अनार्या। लब्धापि खलु इयं सदैव नृपैः दुःखेन परिपाल्यते। यथा मत्तः वारणः दृढपाशबद्धोऽपि पलायते तथैव इयं सामर्थ्यादिसत्त्वेऽपि राजान्तरं ब्रजति। सुखलालिता अतिपौरुषलभ्यापि अनेकराजन्यरथगजवाजिसङ्कुलमपि राजानं झटिति त्यजति। केन वा उपमीयते अस्याः चञ्चलता। गन्धर्वनगरलेखेव पश्यत एव नश्यति। अहो नु विचित्रता अस्याः शीलस्य! इयमपरिचितसौहार्द्या न गणयति सत्कुलं, न वा रूपं, न वा शीलं, न वा पाण्डित्यं, न वा शास्त्रज्ञानं, न वा धर्मम्। किञ्च , नीचस्वभावा इयं न दानमाद्रियते, सुलक्षणं न वरयति। कथं

नु कुतो वा अस्याः चञ्चलता उत्पन्ना? मन्ये, कमलिनीवनेषु विचरणकाले लग्ननलिननालकण्टकक्षतचरणा इयं कुत्रापि दृढं पादं न विधत्ते। नारायणप्रिया भूत्वापि खलजनमाश्रियते। सदैव अविश्वासमयी दिवसान्तकमलमिव विजयकारणभूते सामर्थ्येऽपि राजान्तरमाश्रियते। यथा गङ्गा वसुजनन्यपि सदैव तरङ्गभङ्गैः चञ्चला तथा इयम् – **लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गवुदवुद्चञ्चला।** अन्धकारवहुलपातालगुहा इव इयं तमोगुणसम्पन्ना, क्षणप्रभा इव अचिरस्थायिणी।

अहो नु ईर्ष्या अस्याः! सपत्नीरोषेन गुणवन्तमपवित्रमिव न स्पृशति। मनस्विजनं नाद्रियते, सुजनं दुर्लक्षणमिव न पश्यति, वीरं कण्टकमिव परिहरति, दातारं दुःस्वप्नमिव स्मरति, विनीतं पापिनमिव नाभिनन्दति, प्रशस्तचित्तमुन्मत्तमिव उपहसति, एवं विरुद्धधर्मस्वभावा दुःशीला इयं राजलक्ष्मीः। लक्ष्म्या अप्रतारिताः मानवाः सुदुर्लभाः – **न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्रलब्धः।**

तथाहि सा राजनि धनगर्वमादधानापि सदसद्विवेकहीनत्वमुपजनयति – **एवं विधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवा भवन्ति राजानः।** अभ्युदयमादधानापि मदं जनयति। यद्यपि इयं तोयराशिसम्भवा तथापि जनानां धनादितृष्णां सदैव बर्द्धयति। लोकानामीश्वरतामादधानामपि तेषामसुन्दरस्वभावत्वमातनोति। धनगर्वेण सुरापानेन च मत्ताः नृपाः तदा कस्यापि सद्वाक्यं न शृण्वन्ति, अपात्रे दण्डप्रयोगेन प्रजान् विनश्यन्ति – **दूरस्थितान्यपि फलानीव दण्डविक्षेपैर्महाकुलानि शातयन्ति।** अमृतसहोदरापि इयं दुःखकारणीभूता, लोके परस्परयुद्धसंघटनकारिणी अपि। अहो नु अस्याः प्रभावः! रागादिविवर्जितं जनमपि रागादिदोषयुक्तं करोति। यथा दीपशिखा कज्जलं जनयति तथा इयं चपला यत्र आविर्भवति तत्र परिहिंसा-परपीडनादिकं मलिनं कर्म विषलतानां संबर्द्धनवारिधारा इव, व्याधगीतिरिव इन्द्रियरूपमृगानां विषयाकर्षणं जनयति। धनमत्तानामाश्रयभूमिरियं तिमिररोगादयष्टजनवत् शास्त्रनिष्णातानामपि मोहकारणं जनयति। सर्वाविनयानां, क्रोधादिसर्वदोषानां मदतुल्यविषयानामियं खलु आश्रयभूमिः। किं बहुना दैवबलेन अनया परिगृहीता विवेकयुक्ताः गुणवन्तः कामक्रोधादिदोषरहिता, मोहपारवश्यं यान्ति। अहो नु स्वभावः अस्याः!

अतः नवयौवनागतः चन्द्रापीडः मायामृगलक्ष्मीं परिहरेत्। लक्ष्म्यानुगत्येन खलु स्वजनवर्गान् आत्मीयान् च निकषा सर्वे उपहासास्पदं स्युः। तस्मात् शुकनासः चन्द्रापीडमुपदिश्य

आशीर्ददाति – सर्वथा कल्याणैः पित्रा क्रियमानमनुभवतु भवान्नवयौवराज्याभिषेकमङ्गलम्, कुलक्रमागतामुद्वह पूर्वपुरुषैरूढां धुरम्, अवनमय द्विषतां शिरांसि, उन्नमय वन्धुवर्गम्।

## २. कथा-आख्यायिकयोः प्रभेदं निर्दिश्य कथाकाव्यरूपेण कादम्बरी सार्थका न वेति विचार्यताम्।

**कवेः कर्म इति काव्यम्** – यद्यपि काव्यपरिज्ञानस्याभिज्ञानमिदं तथापि आलंकारिकाः तेषां ग्रन्थेषु काव्यलक्षणमुपनिबद्धाः। तेषु लक्षणेषु विश्वनाथेन प्रदत्ता काव्यसंज्ञा – **वाक्यं रसात्मकं काव्यम्** – सहृदयानां चेतसि रसप्लावनं जनयति। संस्कृतसाहित्ये काव्यस्रोतस्विन्याः द्वौ प्रभेदौ दृश्येते - दृश्यकाव्यं श्रव्यकाव्यं चेति। तदुक्तं साहित्यदर्पणकारेण विश्वनाथेन –

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्।**

तयोः श्रव्यकाव्यं श्रवणयोग्यं, दृश्यकाव्यमभिनययोग्यं भवति। महाकाव्यादि श्रव्यकाव्यान्तर्गतम्। नाटकादि दृश्यकाव्यान्तर्गतम्। पुनः श्रव्यकाव्यं गद्य-पद्य-मिश्रभेदेन त्रिप्रकारकं भवति। **अपादः पदसन्तानः गद्यम्, वृत्तगन्धोज्झितं गद्यम्** – इति लक्षणयुक्तं गद्यकाव्यं पञ्चप्रकारकम् – कथा, आख्यायिका, खण्डकथा, परिकथा, कथालिका चेति। यद्यपि अनेन पञ्चप्रदीपालोकेन संस्कृतगद्यकाव्याङ्गनमालोकितं स्यात्, तथापि कथाख्यायिकादीपद्वैतस्य विच्छुरिता प्रभा गद्यकाव्याङ्गनस्य तमसां निराकरोति।

कथा-अख्यायिकायाः लक्षणनिर्णयप्रसङ्गे आलंकारिकेषु मतानैक्यमस्ति। आख्यायिका(आङ्-ख्या-ण्वुल्-टाप्) उपलब्धार्थकथा इत्यमरः। काव्यालंकारे आख्यायिकायाः संज्ञाप्रदानावसरे भामहेनोक्तम्–

**प्रकृतानुकुलश्रव्यशब्दार्थ पदबृत्तिना।**
**गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता।**
**वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्।**
**वक्त्रं चापरवक्त्रञ्च काले भाव्यर्थशंसि च।**
**कवेरभिप्रायकृतैरङ्कैः कैश्चिदङ्किता।**

Scanned with CamScanner

**कन्याहरणसंग्राम विप्रलम्भोदयान्विता।।**

अर्थात् लोककथामाधृत्य आख्यायिकाया: विषय: गुम्फित: स्यात्। स्वाभिज्ञता नायकेन वर्णिता भवति। कदापि वक्त्रापरवक्त्रछन्दसा च भावीकथाया: वर्णना भवति। परिच्छेदा: उच्छ्वासेन अभिहिता: भवन्ति। सर्वोपरि संस्कृतभाषया गुम्फित: भवति आख्यायिकाया: विषय:।

आख्यायिकाया: स्वरूपं विश्वनाथेन अनेन व्यक्तम्–

**आख्यायिका कथावत् स्यात् कवेर्वंशानुकीर्त्तनम्।**
**तस्यामन्यकवीनाञ्च वृत्तं पद्यं क्वचित् क्वचित्।।**
**कथांशानां व्यवच्छेद आश्वास इति कथ्यते।**
**आर्य्यावक्त्रापरवक्त्राणां छन्दसा येन केनचित्।**
**अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम्।।**

अर्थात् गद्यकाव्येऽस्मिन् कवि: स्वीयवंशपरिचयं प्रददाति। वक्त्रापरवक्त्रछन्दसा विषय: सूच्यते। अध्याया: आश्वासेति परिचीयन्ते।

भामहेन वर्णितानि आख्यायिकाया: लक्षणानि प्रायो दृश्यन्ते अग्निपुराणे। तत्र उपाख्यानान्तरस्य योजनं, प्रतिगर्भे पद्यस्य व्यवहार: इति नवरूपं प्राप्यते। पद्येन गुरु-देवताप्रशंसया आख्यायिका प्रारभ्यते इति रुद्रटमतम्। चतुर्दशशतकस्यालंकारिक: विश्वनाथ: रुद्रटमतं समर्थाय कथास्वरूपविषये भणति –

**कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।**
**क्वचिदत्र भवेदार्य्या क्वचिद् वक्त्रापरवक्त्रके।**
**आदौ पद्यैर्नमस्कार: खलादेर्वृत्तकीर्त्तनम्।।**

अर्थात् सरसगद्येन विषय: वर्णित: भवति कथाकाव्ये। तत्र आर्य्या वक्त्रापरवक्त्रछन्दसा च निबद्ध: श्लोक: स्यात्। ग्रन्थस्य प्रारम्भे पद्येन इष्टदेवताया: स्तुति:, खलनिन्दा प्रकाशितं भवेत्। विषयेऽस्मिन् स्मरणीय: यत् दण्डी अस्य काव्यद्वयस्य भेद: न स्वीकरोति। काव्यादर्शे तेनोक्तम् –

**तत् कथाख्यायिकेत्येका जाति: संज्ञाद्वयाङ्किता।**

आनन्दवर्धनेन अभिनवगुप्तेन चापि कथा-आख्यायिकयो: भेद: तद्रूपेण न कल्पित:।

कथा (क्रथ्-चितिपूजिकथिकुम्बिचर्च्चिश्चेति-अङ्-टाप्) प्रसङ्गे अमरकोषे प्राप्यते- **प्रबन्धकल्पना कथा**। भरतेनोक्तम्–**प्रबन्धस्य कल्पना रचना व्रह्वनृतास्तोकसत्या।**

कथाख्यायिकाया: विषये कोलाहलाचार्येण भणितम् –

**प्रबन्धकल्पनां स्तोकसत्यां प्राज्ञाः कथां विदुः।**
**परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित्।।**

परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित् नास्ति संशयावकाशः।

यद्वा भवतु कथा-आख्यायिकयो: प्रभेद: वर्तते विषयेऽस्मिन् नास्ति संशयावकाश:। अधुना विचारणीय: कादम्बरी कथाकाव्यं न वेति। प्रायै: सर्वै: आलंकारिकै: कथाकाव्यरूपेण कादम्बरी उदाहृता। अत: इदं प्रकटितं यत् कादम्बर्यां कथाकाव्यस्य लक्षणं वर्तते। यत: ब्रह्मा-महेश्वर-गुरुं च नमस्कृत्य काव्यमिदं प्रारभ्यते। कवे: वंशपरिचय: दृश्यते। खलनिन्दा अपि वर्तते। नायकान्तरेण (वैश्मम्पायनेन, महाश्वेतया, जावालिऋषिणा च) काव्यस्य कथा वर्णिता। काव्यस्य विषय: शृङ्गाररससिक्त: रतिभावसमृद्ध: च। स: विषय: सरसगद्येनोपनिबद्ध:। काव्यमध्ये आर्य्या-वक्त्र-अपरवक्त्रछन्दस: प्रयोग अस्ति। काव्यकथा कविकल्पिता उच्छ्वासविवर्जिता च। रमणीलाभोऽपि काव्येऽस्मिन् परिलक्ष्यते।

अत: दृश्यते यत् – आलंकारिकै: निर्दिष्टै: कथाकाव्यस्य सर्वाणि लक्षणानि कादम्बर्यां समुपलभ्यन्ते। तस्मात् नि:संशयेन विवक्षाम: कादम्बरी कथाकाव्यमेकम्।

## ३. वाणभट्टस्य रचनारीत्या: दोष: गुणश्च अन्विष्यताम्।

*हृदि लग्नेन वाणेन यन्मन्दोऽपि पदक्रम:।*
*भवेत् कविकुरङ्गानां चापलं तत्र कारणम्।।*

यस्य प्रस्फुटितस्य पारिजातस्य मधुरगन्धेन गद्यसाहित्यस्य नन्दनकाननं मण्डितम्, काव्यरसिकमधुकरा: रसाहरणाय सततं यं सुमनसमीप्स्यन्ति स एव वाणभट्ट:। वाल्यकाले हि तस्य पितरौ पञ्चत्वं प्राप्तवन्तौ। कुसंसर्गेनाक्रान्त: वाणभट्ट: स्थानीश्वरस्य श्रीहर्षस्यानुग्रहे कविरूपेण यशं लभते।

**गुणविचार:**

**गद्यं कवीनां निकषं वदन्ति** – इति न्यायेण गद्यकाव्यस्य निकषेण कवे: साहित्यशैली ज्ञायते। अस्यां परीक्षायां वाणभट्ट: सानन्देन उत्तीर्णो भवति। तस्मात् तस्य ललाटे **वाणोच्छिष्टं जगत् सर्वम्** इति रक्तचन्दनसूक्ति: शोभते।

वाणभट्ट: संस्कृतसाहित्यं कादम्बरी(कथा) हर्षचरितं (आख्यायिका) काव्यद्वयं उपहाररूपेण प्रदीयते। अस्य काव्यद्वयस्याभ्यन्तरे निहितोऽस्ति वाणभट्टस्य साहित्यगुण:, य: विश्लेषणेन समुद्भासितो भवति।

पाञ्चालीरीत्याः कविरासीत् वाणभट्टः। समासबद्धपदेन दुरुहशब्दप्रयोगेन च रीतिरियं गुम्फिता भवति। वाणस्य रचनायां या परिदृश्यते। कादम्बरीपाठेन प्रकाशयते कवेः वेदादिशास्त्रनिष्णातता। भाव-भाषा-शब्द-अर्थस्य च सम्मेलनक्षेत्रं भवति वाणकाव्यम्।

प्रकृतिवर्णना तस्य रचनाशैल्याः सहजाता वैशिष्ट्या। प्रकृतेः मधुरचित्रं भीषणचित्रञ्च तस्य काव्ये प्राप्नुमः। विन्ध्यारण्यस्य वर्णना सहृदयचित्ते भयं सञ्जायते। परन्तु महर्षेः जावालेः आश्रमम् अनुपमरूपेण चित्रयति। महाश्वेतायाः रूपवर्णनायां, चण्डिकामन्दिरस्य रूपवर्णनायां तस्य शैली परिज्ञायते। वाणभट्टः सचित्तेन प्रकृतिं गृह्णाति, सलोचनेन पृथिव्याः सौन्दर्यं पिवति– इदमनुभूयते।

अलंकारप्रयोगनैपुण्येन वाणभट्टस्य काव्यद्वयम् प्रज्ज्वलितः दीप इव। उपमा-रूपक-समासोक्ति-विरोधाभास-अप्रस्तुतप्रशंसा-दृष्टान्तः प्रभृतयः अलंकाराः राजन्ते तस्य काव्ये। उपमायाः निदर्शनं यथा- **(इयं लक्ष्मीः) लतेव विटपकानध्यारोहति। गङ्गेव वसुजनन्यपि तरङ्गवुद्वुदचञ्चला।** रूपकस्य विरोभासस्य च उदाहरणम्- **यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपस्याति बुद्धिः।** अनेन प्रकारेण कादम्बरीकथाकाव्यं अलंकारपरिहिता युवतीवधूरिव शोभते।

चरित्रचित्रनेऽपि वाणभट्टस्य लेखनी अनायासेन प्रसरति। नेताचरित्रापेक्षा नायिकाचरित्रसर्जने तस्य निपुणता आसीदिति विवक्षामः। कादम्बरी महाश्वेता चरित्रद्वयं तस्य निदर्शनम्।

**न हि रसादृते कश्चिदर्थः प्रवर्तते**- इति भरतः। कादम्बरीकथाकाव्ये शृङ्गाररसः अङ्गीरूपेण, वीरः करुणरसश्च अङ्गत्वेन उपनिबद्धः। वाणकाव्ये श्लेषः, शब्दसंग्रहः, रसप्रयोगः, अलंकारनैपुण्यं, कथावर्णनञ्च अयं पञ्चविधः विषयः सुचारुरूपेण गुम्फितः। तस्मात् चन्द्रदेवेन भणितम्-

**वाणस्तु पञ्चाननः**

सुरापानेन यथा चित्तचाञ्चल्यमागच्छति तथैव कादम्बरीपाठेऽपि। अतः कथ्यते - **कादम्बरीरसज्ञानामाहारोऽपि न रोचते।**

**दोषविचारः**

वाणभट्टस्य रचनायां दोषनर्णियः स्पर्धायाः परिचायकः। तथापि याः न्यूनतमाः दोषाः परिदृश्यन्ते तान् वर्णयामः अधुना-

Scanned with CamScanner

१. काव्यस्य कथासर्जने मौलिकत्वं न परिदृश्यते।

२. कथामध्ये मात्रातिरिक्तस्य उपाख्यानस्य संयोजनं स्मृतिपीड़ाकारणम्।

३. तस्य काव्यस्य कथा सूचनायामत्यन्ता दुर्बोध्या।

४. अलंकारेण समासेन च गुम्फितानि पदानि न सुखकरानि। अत: Weber महोदयेन उक्तम्– Bana's prose is an Indian Wood... । Keith महोदयेन मतमिदं समर्थ्यते।

यद्यपि वाणरचनायां इमे क्षुद्रदोषा: परिदृश्यन्ते, तथापि तस्य लेखन्या संस्कृतगद्यसाहित्यस्य क्षीणतनौ मेद: सञ्जायते विषयेऽस्मिन् नास्ति संशयावकाश:। वाण: संस्कृतसाहित्यस्य मध्याह्नगगने अरुण: सदृश:, तस्य किरणेन सहृदयानां अज्ञानतमसा अपसार्यते देदीप्यते च। तस्मात् सोड्ढलकविना उदयसुन्दरीकथायां वाण: प्रशंस्यते–

**वागीश्वरं हन्त भजेऽभिनन्दमर्थेश्वरं वाक्पतिराजमीड़े।**
**रसेश्वरं स्तौमि च कालिदासं वाणं तु सर्वेश्वर मानतोऽस्मि।।**

## ४. वाणोच्छिष्टं जगत्सर्वम् सूक्तिरियं व्याख्यातव्या।

**वाणोच्छिष्टं जगत् सर्वम्**– इति एक: प्रवाद:। प्रश्नमायाति उच्छिष्टं किम्? कस्यचित् जनस्य भोजनादनन्तरं भोजनपात्रे यदशनीयं द्रव्यम् अवशिष्यते तदेव उच्छिष्टमिति कथ्यते। तद्रूपेण न खलु साहित्यजगति तादृश: कश्चन व्यापारो विद्यते यमवलम्ब्य महाकविना वाणेन किमपि न लिखितम्।

वाणविरचितं गद्यकाव्यद्वयं सर्वजनमादृतम्। तयोरेका कादम्बरी अपरञ्च हर्षचरितम्। हर्षचरितमेव कविना प्रथमं विरचितम् इति सुधियां सिद्धान्त:। कादम्बरी नाम कथाकाव्यं कविना परिणतवयसि विरचितम्। हर्षचरितें ऐतिहासिकं वृत्तमवलम्ब्य गद्यलेखने वाणस्य प्रथम: प्रयास: प्रतीयते। काव्यसरित्तया इदं जीवनचरितं काव्यव्यपदेशं लेभे। अत्र कुत्रचित् उल्लासस्य प्रवाह:, कुत्रचित् करुणस्य निनाद:, कुत्रचित् पुन: राजसुखवर्णनं केषां न सचेतसां चेतांसि हरन्ति। इयम् कादम्बरी खलु सम्पूर्णसंस्कृतगद्यसाहित्यस्य समुज्ज्वलं हीरकं वर्तते। अस्मिन् ग्रन्थे भाषाभावयो: शब्दार्थयोश्च मणिकाञ्चनसंयोग: दृश्यते। वर्णनसौन्दर्य्यं कीदृशम् अद्भुतम् इति विलोक्यताम् विद्वद्भि: तावत् यदि क्वचित् विन्ध्याचलविकटाटव्या दृश्यं तथा साहसप्रेमवत:

Scanned with CamScanner

शवरसैन्यस्य रोमाञ्चकारि वर्णनम् रञ्जयति चित्तं तर्हि क्वचित् धर्मस्य साक्षान्मुर्त्तेः सहृदयतायाः परमावतारस्य, आध्यात्मिकतायाः ज्वलन्तनिदर्शनस्य जावालिमहामुनेः स्वरूपचित्रणम् तथा तस्य परमपावनीभूत-मनोरमाश्रमस्य सुभगशोभा च केषां सहृदयानां हृदयवीणां न कर्षयतः। क्वापि यदि वाल्यकाले गन्धर्वक्रोड़े विहरन्त्याः मधुरभाषिन्या वीणाया इव मञ्जुवादिन्याः स्निग्धहृदयायाः महाश्वेतायाः विरहविधुरा मूर्तिः प्रमोदातिशयम् समासादयति तर्हि क्वचित् अलोकसामान्यसुखमनुभवन्त्या गन्धर्वराजकन्यायाः अतिसरसहृदयायाः कमनीयकलेवरायाः कादम्बर्य्याः प्रेममयी कथा सहृदयपाठकानां चित्तचञ्चरीकं स्वाभिमुखम् आकर्षयति। एकतः यदि अच्छोदसरसः तथा सिद्धायतनस्य परमं हृद्यं चित्रं रमयति चित्तं सहृदयानां, अन्यत्र महामन्त्रिणः शुकनासस्य चन्द्रापीड़मुद्दिश्य उपदेशवाणीततिः विशोधयति चित्तं विशदप्रज्ञानां-, तर्हि चन्द्रापीड़कर्तृकं महाश्वेतासान्त्वनम् आलोच्य अतिनिष्करूणस्य अपि हृदयं कारूण्यविगलितं भवति।

अस्मिन् काव्ये सर्वत्रैव अलङ्काराणां मधुरः झङ्कारः पाठकानां अमन्दमानन्दं जनयति इति न तिरोहितम् केषाञ्चिदपि विपश्चिताम्। रागात्मिका चित्तवृत्तेः सुभगव्यञ्जना सहृदयहृदयं विकशयति अमोदयते च। विशेषतः रसालंकारयोः मधुरमेलने, भाषाभावयोः पारम्परिके सम्पर्के, कल्पनावर्णनयोः अनुकुलसंघटने संस्कृतसाहित्ये प्राचीनार्वाचीनसर्वकथातिशायिनी कादम्बरी अनुपमा अद्वितीया एव।

रसिकहृदयानाम् मदमत्तताविधायिनी सुमधुरा कादम्बरी मदिरा इति रसिका विभावयन्ति। अतः पुलिन्दभट्टस्य एष वचोविन्यासः सुतरां चरितार्थो भवति-

कादम्बरीरसभरेण समस्त एव मत्तो
न किञ्चिदपि चेतयते जनोऽयम्।।

गद्यं कवीनां निकषं वदन्ति। पद्यरचनायां केषुचिदेव पद्येषु उक्तिवैचित्र्येण भावगाम्भीर्य्येण कृतिकौशलेन वा अपूर्वाच्छटा सञ्जायते अखिलेऽपि काव्ये। परं पद्यकाव्ये स्वेदजनकः श्रमः अपेक्षते। पदे पदे अवलोक्यते वाग्वैभवम् भावकाव्यत्वम् अर्थगाम्भीर्य कल्पनावैचित्र्यं च दुर्निवारम्। वाणगद्ये अतिशयेन कमनीयता ओजस्विता मञ्जुलभावाभिव्यञ्जना च समादिष्टाः। वाणो हि गरिष्ठः वरिष्ठः चैतेषां भूयिष्टया भावाभिव्यक्ता साधिष्ठया माधुर्य्यतया श्रेष्ठतया साधुतया पदपरिष्कृत्या च। अतः सोड्डलेनोक्तम् — वाणः कवीनाम् इह चक्रवर्त्ती।

Scanned with CamScanner

वाणस्य काव्यरचनायां दीर्घसमासपण्डिता अल्पसमासपूरिता समासरहिता च इति अनुकूलतयैव शैली वर्तते। क्वचित् मधुरपदविन्यासः क्वचित् च बहुलसमासमेदुरः शब्दमृदङ्गैः जातध्वनिरेव कर्णकुहरम् आह्लादयन्तीव अनुश्रुयते। सूक्तिरियं विषयेऽस्मिन् प्रणिधानयोग्या

**नवोऽर्तः जातिरग्राम्या श्लेषौऽक्लिष्टः स्फुटो रसः।**
**विकटाक्षरबन्धश्च कृत्स्नमेकत्र दुष्करम्।।**

अपि उपलभ्यते वाणस्य काव्यरचनां विभूषयन्ति अलङ्काराः उपमारुपकउत्प्रेक्षाप्रभृतयः काव्यं तथा यथा कटककुड्मलादि-भूषणानि चटुलमत्स्याक्षधारिणीं रमणीम् वाणस्य काव्ये विरोधाभासाक्षेपपरिसंख्यावक्रोक्त्यादयः अप्रचलिता अपि अलङ्काराः उपलभ्यन्ते।

किञ्च कादम्बर्याः पात्रचिन्तनम् अत्युत्तमम्। यद्यपि सर्वाणि एव पात्राणि कल्पितानि तथापि चातुर्येन एतत् चरित्रविकाशः कृतः यत् पाठकाः तत् सुखदुःखेषु तन्मयीभूय स्वमपि विस्मरन्ति, तदा तेषां पात्रकाल्पनिकताया ध्यानमेव न तिष्ठति। अपि च काव्यस्य उद्देश्यस्य **सत्यं शिवं सुन्दरम्** इति विशेषितस्य कल्याणस्य विनिवेशने वाणः जागरुकः इति तदीयकादम्बरी-परिशीलनेनैव प्रतीयते।

किमु वक्तव्यम् – वाणस्य रचनायां सर्वाणि एव दार्शनिकतत्त्वानि, स्मृत्यादिशास्त्रनिर्दिष्टानि तत्त्वानि, पुराणेतिहासज्योतिषभेषजशास्त्रविषयकानि तथा लोकाचारसम्मतानि च तथा निबद्धानि प्रकाशितानि च कविजनोचितानि सर्वाण्येव चातुर्याणि-यानि निष्प्रपञ्चमेव मञ्जुलानि। एतेषां सुष्ठु समवायः अन्यत्र कुत्रापि नैव दृश्यते।

संस्कृतभाषाकविषु वाणसमानः कोऽपि शब्दचित्रप्रस्तुतौ सिद्धहस्तो नाभूत् इति कथनं नितान्तसत्यम्। एतत् सकलमेव वैशिष्ट्यं मनसि निधाय समीरितं गोवर्धनाचार्येण –

**जाता शिखण्डिनी प्राग्यथा शिखण्डी तथावगच्छामि।**
**प्राग्लभ्यमधिकमाप्तुं वाणी वाणो वभूवेति।।**

एवमेव पर्य्यालोचनालोके एतदेव सम्यक्तया प्रतीयते यत् वाणगद्येषु सूक्ष्मनिरीक्षणशक्तिः चमत्कारवर्णनप्रणाली अक्षयशब्दराशिः तथा कल्पनाप्रसूतालौकिकार्थानामुद्भावना विशेषरूपेण उपलभ्यन्ते। एतद् सकलमेव वैशिष्ट्यम् एकत्र अन्यत्र दुरापमेव। यदि कोऽपि काव्यं विरचितुं चिकीर्षेत् तदेतत् प्रदर्शितालंकारादि

Scanned with CamScanner

उच्छिष्टमेव भवेत्। न तु कदाचिदपि ततः उत्कृष्टम्। अतः एतत् भूतार्थमेव अवगम्य वाणोच्छिष्टं जगत् सर्वम् इति सुष्ठु वदन्ति मनीषिणः।

## ५. चन्द्रापीडं प्रति शुकनासोपदेशाः लिख्यताम्।

**महाजनो येन गतो सः पन्था** – इति महाभारतवचनेन वयं सन्मार्गे जिगमिषामः। जीवननिर्वाहनार्थं गुरोरुपदेशः सर्वाग्रे प्रयोजनः भवति। अयमुपदेशः प्रत्यक्षभावेन गुरुमुखात् काव्यवचनाद्वा प्राप्स्यामः। अतः काव्यप्रयोजनवर्णनावसरे मम्मटेनोक्तम् – **व्यवहारविदे।** नीतिवाक्यं हृदयं नीत्वा जीवनमार्गे गन्तुं शक्नुमः। नीतिवाक्यमिदं नृपस्यापि प्रयोजनमस्ति। तस्मात् गुरुगृहात् विद्यार्जनं समाप्य चन्द्रापीडः यदा गृहं प्रत्यागच्छति तदा शुकनासः तमुपदेशयति। यतः चन्द्रापीडस्य जनकः तारापीडः तं उज्जयिनीसिंहासने अभिषिक्तुमिच्छति। तारापीडस्य प्राज्ञः प्रबीनः प्रधानः महामात्यः शुकनासः चन्द्रापीडाय यान् उपदेशान् प्रयच्छति तान् अधः वर्णयामः।

यौवनप्रभावेन मानवमनसि यः तिमिरः आगच्छति, सः कोटिसूर्यप्रभया न दूरीभवति। अतः शुकनासेन उच्यते – **अतिगहनं तमो यौवनप्रभम्।** यौबनेन साकं यदि ऐश्वर्यमोहः युक्तः भवति तर्हि किमपि औषधेन सः व्याधिः नापगच्छति। अतः कथ्यते – **अपरिणामोपशमो दारूणा लक्ष्मीमदः।** विषयेऽस्मिन् विष्णुशर्मणाऽपि उक्तम् –

**यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।**
**एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।**

यौवनागमे कामक्रोधादियुक्ते चित्ते भोग्यपदार्थाः मधुराः मन्यते। अस्मिन् वयसि सद्गुरुवाक्यं तेषां सन्मार्गे प्रेरितुं शक्नोति। यतः सद्व्यक्तिः गुरोरुपदेशं गजकर्णभूषन इव सादरेण गृह्णाति। अधुना चन्द्रापीडोऽपि विषये अनासक्तः। अतः उपदेशप्रदानाय उपयुक्तः कालोऽयम् – **अयमेव चानास्विदित विषयरसस्य ते काल उपदेशस्य।**

यौवनविषये उपदेशात् परं शुकनासः लक्ष्मीचञ्चलतां वर्णयति। लक्ष्म्या कुल-शील-मान-विद्या-वुद्धि-धर्मश्च न ग्राह्यते। विदुषः जनान् सा परित्यजति। लक्ष्म्या अप्रतारिताः मानवाः सुदुर्लभाः। लक्ष्मीकृपाकटाक्षेन राज्ञां वुद्धिः नश्यते। धनमोहे ते नृपाः स्वं देवं मन्यन्ते। लक्ष्मीः यत्र यत्र आविर्भूता भवति तत्र तत्र पापकर्म जनयति – **यथा यथा चेयं**

Scanned with CamScanner

चपला दीप्यते तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति। लक्ष्मीदेव्या: कृपया राजान: व्यसनासक्ता: भवन्ति शास्त्रनिषिद्धानि कर्माणि कुर्वन्ति च – अलीकाभिमानोन्मदकारिणी धनानि। राज्यविषविकारतन्त्रीपदा राजलक्ष्मी:।

लक्ष्मीचरित्रं वर्णयित्वा चाटुकाराणां स्वभाव: वर्ण्यते शुकनासेन। ते धूर्ता: स्वार्थान्वेषिण: भवन्ति। राज्ञ: दोषान् ते गुणरूपेण राजसमीपे समुपस्थापयन्ति। अनेन धूर्तानां स्तुतिवचनेन राजा स्वं शिवं मन्यते। मिथ्यामाहात्म्ये गर्वित: राजा देवान् न प्रणमति, गुरुजनेभ्य: न सम्मानं प्रयच्छति, विदुष: उपहसति, अमात्यानामुपदेशं न शृणोति, केवलं चाटुकाराणां मधुरमहितकरवाक्यं गृह्णाति। अत: इन्द्रियान् संयम्य राजशासनकर्तव्यम्। चन्द्रापीड: गुरुजनेभ्य: न तिरस्कृतं भवतु, मित्रान् निकषा नोपहासास्पदं भवतु इति शुकनासस्याभिलाष:।

छिद्रेष्वनर्था: बहुली भवन्तीति न्यायेन बहुना छिद्रेण बहव: दोषा: आगच्छन्ति। व्यसनेन मानवा: दोष: प्राप्स्यन्ते। अयं दोष: खलु प्रध्वंसकारक:। मनुनापि मनुसंहिताया: राजधर्म इति सप्तमाध्याये व्यसनं अष्टादशप्रकारेण विभज्य उक्तम् – **व्यसनानि दुरन्तानि।** अत: चन्द्रापीड: व्यसनं परित्यज्य प्रजापालयतु अयमेव शुकनासस्याभिप्राय:।

*************

**" শেষ হইয়াও**

**যেন হইলো না শেষ।"**

# সংক্ষিপ্তপ্রশ্নোত্তরিকা (সংস্কৃত ভাষায়)

१. वाणभट्टः कः आसीत्? तस्य रचनाः काः आसन्?

১। বাণভট্টঃ কঃ আসীৎ? তস্য রচনাঃ কাঃ আসন্?

उत्तरः वात्स्यगोत्रीयः चित्रभानु-राज्यदेव्याः पुत्रः महाकविः वाणभट्टः। सः महाराजस्य हर्षवर्धनस्य सभाकविः आसीत्। गद्यकवित्रयाणाम् अन्यतमः महाकविः वाणभट्टः।

हर्षचरितं कादम्बरी च तस्य प्रसिद्धगद्यकाव्यम्। एतद्व्यतीतं 'चण्डीशतकम्' 'पार्वतीपरिणयः', कादम्बरीकाव्यस्य पद्यरूपं 'मुकुटताडितम्' अपि वाणभट्टेण विरचितम्।

বাৎস্যগোত্রীয়ঃ চিত্রভানু-রাজ্যদেব্যাঃ পুত্রঃ মহাকবিঃ বাণভট্টঃ। সঃ মহারাজস্য হর্ষবর্ধনস্য সভাকবিঃ আসীৎ। গদ্যকবিত্রয়াণাম্ অন্যতমঃ মহাকবি বাণভট্টঃ।

হর্ষচরিতং কাদম্বরী চ তস্য প্রসিদ্ধগদ্যকাব্যম্। এতদ্ব্যতীতং 'চণ্ডীশতকম্', 'পার্বতীপরিণয়ঃ', কাদম্বরীকাব্যস্য পদ্যরূপং 'মুকুটতাড়িতম্' অপি বাণভট্টেণ বিরচিতম্।

२. गद्यकाव्यं किम्?

২। গদ্যকাব্যং কিম্?

उत्तरः पादः तथा छन्दोविहीनैः वाक्यैः रचितं काव्यं गद्यम्- *'अपादः पदसन्तानो गद्यम्'*। साहित्यदर्पणानुसारं वृत्तबन्धोज्झितं गद्यम्–वृत्तबन्धनहीनं काव्यं गद्यम्। वृत्तं पद्यम्। वृत्तवन्धनमुक्तं गद्यम्। वृत्तवन्धनहीनेन गद्येन यदा रससिक्तं काव्यं विरच्यते तत् गद्यकाव्यम् भवति। उक्तञ्च श्रीमता विश्वनाथकविराजेन- *'वाक्यं रसात्मकं काव्यम्'*।

পাদঃ তথা ছন্দোবিহীনৈঃ বাক্যৈঃ রচিতং কাব্যং গদ্যম্-*'অপাদঃ পদসন্তানো গদ্যম্'*। সাহিত্যদর্পণানুসারং বৃত্তবন্ধোজ্ঝিতং গদ্যম্—বৃত্তবন্ধনহীনং কাব্যং গদ্যম্। বৃত্তং পদ্যম্। বৃত্তবন্ধনমুক্তং গদ্যম্। বৃত্তবন্ধনহীনেন গদ্যেন যদা রসসিক্তং কাব্যং বিরচ্যতে তৎ গদ্যকাব্যম্ ভবতি। উক্তঞ্চ শ্রীমতা বিশ্বনাথকবিরাজেন— *'বাক্যং রসাত্মকং কাব্যম্'*।

३. गद्यं कतिविधं किञ्च तावत्?

৩। গদ্যং কতিবিধং কিঞ্চ তাবৎ?

उत्तरः साधारणतया गद्यं द्विविधम्-कथा आख्यायिका चेति। किन्तु अग्निपुराणानुसारं गद्यं पञ्चविधम्-कथा, आख्यायिका, खण्डकथा, परिकथा, कथालिका च। रूपवैशिष्ट्यानुसारं दर्पणकारेण गद्यं चतुर्धा विभक्तम्-मुक्तकं, वृत्तगन्धि,

उत्कलिकाप्रायः चूर्णकं चेति।

সাধারণতয়া গদ্যং দ্বিবিধম্—কথা আখ্যায়িকা চেতি। কিন্তু অগ্নিপুরাণানুসারং গদ্যং পঞ্চবিধম্—কথা, আখ্যায়িকা, খণ্ডকথা, পরিকথা, কথালিকা চ। রূপবৈশিষ্ট্যানুসারং দর্পণকারেণ গদ্যং চতুর্ধা বিভক্তম্—মুক্তকং, বৃত্তগন্ধি, উৎকলিকাপ্রায়ঃ, চূর্ণকং চেতি।

४. **उदाहरणेन सह कथाकाव्यस्य लक्षणं दीयताम्।**

৪। **উদাহরণেন সহ কথাকাব্যস্য লক্ষণং দীয়তাম্।**

उत्तर: यस्मिन् काव्ये उच्छ्वासविभागः नास्ति, काहिनीवस्तु संस्कृतनिबद्धं अपभ्रंशनिबद्धं वा भवति, नायकभिन्नं अन्यः कोऽपि वक्ता भवति, काहिनीवस्तु रससिक्तं भवति तत् कथाकाव्यम्। साहित्यदर्पणानुसारं कथाकाव्यस्य लक्षणं यथा-

*"कथायां सरसं वस्तु गद्यैरेव विनिर्मितम्।*
*क्वचिदत्र भवेदार्य्या क्वचिद् वक्त्रापरवक्त्रके।*
*आदौ पद्यैर्नमस्कारः खलादेर्वृत्तकीर्त्तनम्।।"*

उदाहरणं यता-महाकवेः वाणभट्टस्य कादम्बरीकाव्यम्।

যস্মিন্ কাব্যে উচ্ছ্বাসবিভাগঃ নাস্তি, কাহিনীবস্তু সংস্কৃতনিবদ্ধং অপভ্রংশনিবদ্ধং বা ভবতি, নায়কভিন্নং অন্যঃ কোঽপি বক্তা ভবতি, কাহিনীবস্তু রসসিক্তং ভবতি তৎ কথাকাব্যম্। সাহিত্যদর্পণানুসারং কথাকাব্যস্য লক্ষণং যথা—

*"কথায়াং সরসং বস্তু গদ্যৈরেব বিনির্মিতম্।*
*ক্বচিদত্র ভবেদার্য্যা ক্বচিদ্ বক্ত্রাপরবক্ত্রকে।*
*আদৌ পদ্যৈর্নমস্কারঃ খলাদের্বৃত্তকীর্ত্তনম্।।"*

উদাহরণং যথা -মহাকবেঃ বাণভট্টস্য কাদম্বরী কাব্যম্।

५. **कादम्बरी कथाकाव्यस्य लक्षणसङ्गतिः व्याख्येया।**

**अथवा**

**कथं कादम्बरीकाव्यं कथाकाव्यलक्षणोपेतं तत् निरूप्यताम्?**

৫। **কাদম্বরী কথাকাব্যস্য লক্ষণসঙ্গতিঃ ব্যাখ্যেয়া।**

**অথবা**

**কথং কাদম্বরীকাব্যং কথাকাব্যলক্ষণোপেতং তৎ নিরূপ্যতাম্?**

उत्तर: कादम्बर्याः प्रारम्भिकश्लोकैः ब्रह्माणं शिवं च प्रति कविना नमस्कारं निवेद्य उत्तमकाव्यस्य फलश्रुतिः कर्वेवंशपरिचयः च प्रदत्तः। तत्र खलादीनां निन्दा चापि



Scanned with CamScanner

वर्णिता। नायकः चन्द्रापीडः तत्र न वक्ता, वक्तारश्च-वैशम्पायनः, तपस्विनी महाश्वेता, महर्षिः जावालिश्च। कादम्बरी शृङ्गाररससिक्ता। रसवोधेन औचित्यविचारपूर्णवाक्येन काव्यमिदं ग्रथितम्। अत्र कोऽपि उच्छ्वासविभागः नास्ति। कादम्बरीकाव्ये एकाधिकः कन्यालाभविषयः वर्णितः। आर्या-वक्त्र-अपरवक्त्राणां छन्दसां प्रयोगोऽपि कविना कृतः। अथ कादम्बरीकाव्यं निश्चप्रचमेव कथाकाव्यलक्षणोपेतम्।

কাদম্বর্যাঃ প্রারম্ভিকশ্লোকৈঃ ব্রহ্মাণং শিবং চ প্রতি কবিনা নমস্কারং নিবেদ্য উত্তমকাব্যস্য ফলশ্রুতিঃ কর্বেবংশপরিচয়ঃ চ প্রদত্তঃ। তত্র খলাদীনাং নিন্দা চাপি বর্ণিতা। নায়কঃ চন্দ্রাপীড়ঃ তত্র ন বক্তা, বক্তারশ্চ—বৈশম্পায়নঃ, তপস্বিনী মহাশ্বেতা, মহর্ষিঃ জাবালিশ্চ। কাদম্বরী শৃঙ্গাররসসিক্তা। রসবোধেন ঔচিত্যবিচারপূর্ণবাক্যেন কাব্যমিদং গ্রথিতম্। অত্র কোঽপি উচ্ছ্বাসবিভাগঃ নাস্তি। কাদম্বরীকাব্যে একাধিকঃ কন্যালাভবিষয়ঃ বর্ণিতঃ। আর্যা-বক্ত্র-অপরবক্ত্রাণাং ছন্দসাং প্রয়োগোঽপি কবিনা কৃতঃ। অথ কাদম্বরীকাব্যং নিশ্চপ্রচমেব কথাকাব্যলক্ষণোপেতম্।

**६. किं प्रकारकं काव्यं कादम्बरी इति? तत्र नायिका-नायकौ कौ स्तः?**

**৬। কিং প্রকারকং কাব্যং কাদম্বরী ইতি? তত্র নায়িকা-নায়কৌ কৌ স্তঃ?**

**उत्तरः** कादम्बरी कथा प्रकारकं गद्यकाव्यम्। कादम्बर्याः प्रारम्भिकश्लोकैः ब्रह्माणं शिवं च प्रति कविना नमस्कारं निवेद्य उत्तमकाव्यस्य फलश्रुतिः कर्वेवंशपरिचयः च प्रदत्तः। तत्र खलादीनां निन्दा चापि वर्णिता। नायकः चन्द्रापीडः तत्र न वक्ता, वक्तारश्च-वैशम्पायनः, तपस्विनी महाश्वेता, महर्षिः जावालिश्च। कादम्बरी शृङ्गाररससिक्ता। रसवोधेन औचित्यविचारपूर्णवाक्येन काव्यमिदं ग्रथितम्। अत्र कोऽपि उच्छ्वासविभागः नास्ति। कादम्बरीकाव्ये एकाधिकः कन्यालाभविषयः वर्णितः। आर्या-वक्त्र-अपरवक्त्राणां छन्दसां प्रयोगोऽपि कविना कृतः। कविना कृतः।

अत्र नायकः उज्जयिनीराजपुत्रः चन्द्रापीडः। नायिका च गन्धर्वराजकन्या कादम्बरी।

কাদম্বরী কথা প্রকারকং গদ্যকাব্যম্। কাদম্বর্যাঃ প্রারম্ভিকশ্লোকৈঃ ব্রহ্মাণং শিবং চ প্রতি কবিনা নমস্কারং নিবেদ্য উত্তমকাব্যস্য ফলশ্রুতিঃ কর্বেবংশপরিচয়ঃ চ প্রদত্তঃ। তত্র খলাদীনাং নিন্দা চাপি বর্ণিতা। নায়কঃ চন্দ্রাপীড়ঃ তত্র ন বক্তা, বক্তারশ্চ—বৈশম্পায়নঃ, তপস্বিনী মহাশ্বেতা, মহর্ষিঃ জাবালিশ্চ। কাদম্বরী শৃঙ্গাররসসিক্তা। রসবোধেন ঔচিত্যবিচারপূর্ণবাক্যেন কাব্যমিদং গ্রথিতম্। অত্র

Scanned with CamScanner

কোঽপি উচ্ছ্বাসবিভাগঃ নাস্তি। কাদম্বরীকাব্যে একাধিকঃ কন্যালাভবিষয়ঃ বর্ণিতঃ। আর্যা-বক্ত্র-অপরববক্ত্রাণাং ছন্দসাং প্রয়োগোঽপি কবিনা কৃতঃ। কবিনা কৃতঃ।

অত্র নায়কঃ উজ্জয়িনীরাজপুত্রঃ চন্দ্রাপীড়ঃ। নায়িকা চ গন্ধর্বরাজকন্যা কাদম্বরী।

**৭. 'कादम्बरी' इति शब्दस्य कोऽर्थ ?**

**৭। 'কাদম্বরী' ইতি শব্দস্য কোঽর্থ ?**

उत्तर: विविधदृशा 'कादम्बरी' शब्दस्य अर्थ: निष्पद्यते-

i) कदम्ब + अण् = कादम्ब। कादम्ब + रु + ड + ङीप् = कादम्बरी। कदम्ब: कलहंस:। कलहंस सदृशी रवकारिणी इति कादम्बरी।

ii) कु कुत्सितम् अम्बरं यस्य स: = कदम्बर:। नीलवसनावृत:। कदम्बर + ङीप् = कदम्बरी > कादम्बरी। नीलबसनावृता सुन्दरी नारी।

iii) कदम्बपुष्पजातं मधु = कादम्बम्। कादम्ब + दा + ड + ङीप् = कादम्बरी तथा मदिरा सुरा वा।'कादम्बरीरसज्ञानामाहारोऽपि न रोचते'।

iv) कादम्बरी नामिकां नायिकाम् अधिकृत्य रचिता कथा कादम्वरी।

বিবিধদৃশা 'কাদম্বরী' শব্দস্য অর্থঃ নিষ্পদ্যতে—

i) কদম্ব + অণ্ = কাদম্ব। কাদম্ব + রু + ড +ঙীপ্ = কাদম্বরী। কদম্বঃ কলহংসঃ। কলহংস-সদৃশী রবকারিণী ইতি কাদম্বরী।

ii) কু কুৎসিতম্ অম্বরং যস্য সঃ = কদম্বরঃ। নীলবসনবসনাবৃতঃ। কদম্বর + ঙীপ্ = কদম্বরী > কাদম্বরী। নীলবসনাবৃতা সুন্দরী নারী।

iii) কদম্বপুষ্পজাতং মধু = কাদম্বম্। কাদম্ব + দা + ড + ঙীপ্ = কাদম্বরী তথা মদিরা সুরা বা। 'কাদম্বরীরসজ্ঞানামাহরোঽপি ন রোচতে'।

iv) কাদম্বরী নামিকাং নায়িকাম্ অধিকৃত্য রচিতা কথা কাদম্বরী।

**৮. कादम्बरी काव्यस्य रचयिता क: भवति ? कस्य पृष्ठपोषकतां प्राप्य कविना कादम्बरी रचिता ?**

**৮। কাদম্বরী কাব্যস্য রচয়িতা কঃ ভবতি ? কস্য পৃষ্ঠপোষকতাং প্রাপ্য কবিনা কাদম্বরী রচিতা ?**

उत्तर: कादम्बरी काव्यस्य रचयिता महाकवि: वाणभट्ट:।

महाराजस्य हर्षवर्धनस्य पृष्ठपोषकतां प्राप्य वाणभट्टेण कादम्बरीकथाकाव्यं विरचितम्।

কাদম্বরী কাব্যস্য রচয়িতা মহাকবিঃ বাণভট্টঃ।

মহারাজস্য হর্ষবর্ধনস্য পৃষ্ঠপোষকতাং প্রাপ্য বাণভট্টেণ কাদম্বরীকথাকাব্যং

Scanned with CamScanner

विरचितम्।

९. शुकनास: क: आसीत्? तेन क: उपदिष्ट: अभवत्?

৯। শুকনাসঃ কঃ আসীৎ? তেন কঃ উপদিষ্টঃ অভবৎ?

उत्तर: उज्जयिन्या: महाराजस्य तारापीडस्य विश्वस्त: प्राज्ञ: सचिव: शुकनास:। यौवराज्याभिषेकस्य प्राक् विनयी सुशिक्षित: युवराज: चन्द्रपीड: महामन्त्रिना शुकनासेन उपदिष्ट: अभवत्।

উজ্জয়িন্যাঃ মহারাজস্য তারাপীড়স্য বিশ্বস্তঃ প্রাজ্ঞঃ সচিবঃ শুকনাসঃ। যৌবরাজ্যাভিষেকস্য প্রাক্ বিনয়ী সুশিক্ষিতঃ যুবরাজঃ চন্দ্রপীড়ঃ মহামন্ত্রিনা শুকনাসেন উপদিষ্টঃ অভবৎ।

१०. चन्द्रापीड: क: आसीत्?

১০। চন্দ্রাপীড়ঃ কঃ আসীৎ?

उत्तर: उज्जयिन्या: महाराजस्य तारापीडस्य विद्याविनयसम्पन्न: पुत्र: चन्द्रापीड:। शापभ्रष्ट: चन्द्रदेव: चन्द्रापीडरूपेण विलासवती-तारापीडयो: पुत्ररूपेण अजायत। अयं च चन्द्रापीड: परवर्त्तिनि जन्मनि विदिशाधिपतिशूद्रकरूपेणापि अजायत। स: च: चन्द्रापीड: कादम्बरी काव्यस्य नायक:।

উজ্জয়িন্যাঃ মহারাজস্য তারাপীড়স্য বিদ্যাবিনয়সম্পন্নঃ পুত্রঃ চন্দ্রাপীড়ঃ। শাপভ্রষ্টঃ চন্দ্রদেবঃ চন্দ্রাপীড়রূপেণ বিলাসবতী-তারাপীড়য়োঃ পুত্ররূপেণ অজায়ত। অয়ং চ চন্দ্রাপীড়ঃ পরবর্ত্তিনি জন্মনি বিদিশাধিপতিশূদ্রকরূপেণাপি অজায়ত। সঃ চঃ চন্দ্রাপীড়ঃ কাদম্বরী কাব্যস্য নায়কঃ।

११. शुकनास: कथं चन्द्रापीडम् उपदिष्टवान्?

১১। শুকনাসঃ কথং চন্দ্রাপীড়ম্ উপদিষ্টবান্?

उत्तर: युवराज: चन्द्रापीड: सद्य: गुरुगृहात् प्रत्यागत:। स: च चन्द्रापीड: यथा विद्वान् बुद्धिमान्, विचक्षण: तथा विनयी। सद्य: तेन यौवनपदवी प्राप्ता। राज्याभिषेकात् पूर्वं स: उज्जयिन्या: महामन्त्रिना शुकनासेन सह साक्षात्करणाय आगत:। महामन्त्री शुकनास: विनीतं चन्द्रापीडम् अधिकतरं विनीतकरणाय यौवनजनितविपद्विषये सतर्ककरणाय समयोचितम् उपदेशं प्रदत्तवान्।

যুবরাজঃ চন্দ্রাপীড়ঃ সদ্যঃ গুরুগৃহাৎ প্রত্যাগতঃ। সঃ চ চন্দ্রাপীড়ঃ যথা বিদ্বান্ বুদ্ধিমান্, বিচক্ষণঃ তথা বিনয়ী। সদ্যঃ তেন যৌবনপদবী প্রাপ্তা। রাজ্যাভিষেকাৎ পূর্বং সঃ উজ্জয়িন্যাঃ মহামন্ত্রিনা শুকনাসেন সহ সাক্ষাৎকরণায় আগতঃ। মহামন্ত্রী শুকনাসঃ বিনীতং চন্দ্রাপীড়ম্ অধিকতরং বিনীতকরণায় যৌবনজনিতবিপদ্বিষয়ে

সতর্ককরণায় সময়োচিতম্ উপদেশং প্রদত্তবান্।

१२. वाणभट्टस्य वंशपरिचयः प्रदेयः।

১২। বাণভট্টস্য বংশপরিচয়ঃ প্রদেয়ঃ।

उत्तरः वाणभट्टः स्वयं पौराणिकीं धारामनुसृत्य स्रष्टुः ब्रह्मणः आरभ्य आत्मनः वंशपरिचयं प्रदत्तवान्। ब्रह्मणः पुलहः, पुलहात् वात्स्यः, वात्स्यात् कुबेरः जातः। कुवेरस्य पुत्रेषु कनिष्ठः पशुपतिः। पशुपतेः पुत्रः अर्थपतिः। अर्थपतेः एकादश पुत्रेषु अन्यतमः चित्रभानुः। तस्य च चित्रभानोः पुत्रः वाणभट्टः। राज्यदेवी वाणभट्टस्य जननी।

<u>वाणभट्टस्य कुलपञ्जी</u>

↓

ब्रह्मा

↓

पुलहः

↓

वात्स्यः

↓

कुवेरः

↓ अच्युतः, ↓ ईशानः ↓ हरः ↓ पशुपतिः

↓

अर्थपतिः

↓ भृगुः ↓ हंसः ↓ शुचिः ↓ कविः ↓ महीदत्तः ↓ धर्मः ↓ जातवेदः ↓ चित्रभानुः ↓ त्र्यक्षः ↓ अहिदत्तः ↓ विश्वरूपः

↓

वाणभट्टः

↓


भूषणभट्टः

বাণভট্টঃ স্বয়ং পৌরাণিকীং ধারামনুসৃত্য স্রষ্টুঃ ব্রহ্মণঃ আরভ্য আত্মনঃ বংশপরিচয়ং প্রদত্তবান্। ব্রহ্মণঃ পুলহঃ, পুলহাৎ বাৎস্যঃ, বাৎস্যাৎ কুবেরঃ জাতঃ। কুবেরস্য পুত্রেষু কনিষ্ঠঃ পশুপতিঃ। পশুপতেঃ পুত্রঃ অর্থপতিঃ। অর্থপতেঃ একাদশ পুত্রেষু

Scanned with CamScanner

অন্যতমঃ চিত্রভানুঃ। তস্য চ চিত্রভানোঃ পুত্রঃ বাণভট্টঃ। রাজ্যদেবী বাণভট্টস্য জননী।

**বাণভট্টস্য কুলপঞ্জী**




१३. कादम्बरी का आसीत्?

১৩। কাদম্বরী কা আসীৎ?

उत्तर: कादम्बरी वाणभट्टकृतस्य कादम्बरीकथाकाव्यस्य नायिका। सा कैलासपर्वतवासिन: गन्धर्वराजस्य चित्ररथस्य कन्या। लास्यमयी नायिका कादम्बरी शापभ्रष्टा रोहिनी। महाश्वेता तस्या: सखी महाश्वेता कादम्बरीकाव्यस्य सहनायिका। अच्छोदसरोवरतीरे शिवालये सा महाश्वेता प्राणप्रियस्य पुण्डरीकस्य कृते तपस्यारता आसीत्। हेमकूटपर्वते महाश्वेताया: सहयोगेन कादम्बरी-चन्द्रापीडयो: परिचय: जात:। परस्परानुरागवशात् कादम्बरी-चन्द्रापीडयो: मिलनं संगठितम्।

কাদম্বরী বাণভট্টকৃতস্য কাদম্বরীকথাকাব্যস্য নায়িকা। সা কৈলাসপর্বতবাসিনঃ গন্ধর্বরাজস্য চিত্ররথস্য কন্যা। লাস্যময়ী নায়িকা কাদম্বরী শাপভ্রষ্টা রোহিনী।

Scanned with CamScanner

মহাশ্বেতা তস্যাঃ সখী। মহাশ্বেতা কাদম্বরীকাব্যস্য সহনায়িকা। অচ্ছোদসরোবরতীরে শিবালয়ে সা মহাশ্বেতা প্রাণপ্রিয়স্য পুণ্ডরীকস্য কৃতে তপস্যারতা আসীৎ। হেমকূটপর্বতে মহাশ্বেতায়াঃ সহযোগেন কাদম্বরী-চন্দ্রাপীড়য়োঃ পরিচয়ঃ জাতঃ। পরস্পরানুরাগবশাৎ কাদম্বরী-চন্দ্রাপীড়য়োঃ মিলনং সংগঠিতম্।

**१४. कथं वाणभट्टेण कादम्बरीकाव्यं समाप्तं जातम् ?**

**১৪। কথং বাণভট্টেণ কাদম্বরীকাব্যং সমাপ্তং জাতম্?**

उत्तर: कादम्बरीकाव्यं वाणभट्टेण न सम्पूर्णकृतम्। कादम्बरीकाव्यस्य द्वौ विभागौ-पूर्वभाग: उत्तरभागश्च। पूर्वभाग: वाणभट्टेण सम्पूर्ण: कृत:। उत्तरभागस्य कियदंशोऽपि तेन रचित:। किन्तु वाणभट्टस्य मृत्यो: परं कविपुत्रेण भूषणभट्टेण पितुरादेशात् अवशिष्टभाग: सम्पूर्णकृत:।

কাদম্বরীকাব্যং বাণভট্টেণ ন সম্পূর্ণকৃতমং। কাদম্বরীকাব্যস্য দ্বৌ বিভাগৌ-পূর্বভাগঃ উত্তরভাগশ্চ। পূর্বভাগঃ বাণভট্টেণ সম্পূর্ণঃ কৃতমঃ। উত্তরভাগস্য কিয়দংশোঽপি তেন রচিতঃ। কিন্তু বাণভট্টস্য মৃত্যোঃ পরং কবিপুত্রেণ ভূষণভট্টেণ পিতুরাদেশাৎ অবশিষ্টভাগঃ সম্পূর্ণকৃতঃ।

**१५. 'कादम्बरी रसज्ञानामाहारोऽपि न रोचते'-व्याख्यायताम् ?**

**১৫। 'কাদম্বরী রসজ্ঞানামাহারোঽপি ন রোচতে'—ব্যাখ্যায়তাম্।**

उत्तर:कादम्बरी संस्कृतसाहित्यस्य श्रेष्ठगद्यकाव्यम्। गुणोत्कर्षेण कादम्बरी अन्येभ्य: विशिष्यते। शृङ्गाररसोपेतं कादम्बरी काव्यं विविधै: शब्दार्थालङ्कारै: अनन्यम्। कादम्बरीकाव्यस्य सौन्दर्येन मुग्धा: पाठका: मदिरासक्ता: इव सदैव आच्छन्ना:। मदिरासक्ता: जना: यथा मदिराम् अन्तरेण अन्यत् आहारै: तृप्ता: न भवन्ति तथैव कादम्बरीकाव्यस्य रसं परित्यज्य अन्येषु काव्येषु पाठका: न रमन्ते। कादम्बरीकाव्यस्य श्रेष्टत्वं प्रतिपाद्य महकविना वाणभट्टेण स्वयमुक्त:-'रसेन शय्याह स्वयमभ्युपागता कथा जनस्याभिनवा वधूरिव'।

কাদম্বরী সংস্কৃতসাহিত্যস্য শ্রেষ্ঠগদ্যকাব্যম্। গুণোৎকর্ষেণ কাদম্বরী অন্যেভ্যঃ বিশিষ্যতে। শৃঙ্গাররসোপেতং কাদম্বরী কাব্যং বিবিধৈঃ শব্দার্থালঙ্কারৈঃ অনন্যম্। কাদম্বরীকাব্যস্য সৌন্দর্যেন মুগ্ধাঃ পাঠকাঃ মদিরাসক্তাঃ ইব সদৈব আচ্ছন্নাঃ। মদিরাসক্তাঃ জনাঃ যথা মদিরাম্ অন্তরেণ অন্যৎ আহারৈঃ তৃপ্তাঃ ন ভবন্তি তথৈব কাদম্বরীকাব্যস্য কাদম্বরীকাব্যস্য রসং পরিত্যজ্য পাঠকাঃ অন্যেষু কাব্যেষু ন রমন্তে। কাদম্বরীকাব্যস্য শ্রেষ্ঠত্বং প্রতিপাদ্য মহকবিনা বাণভট্টেণ স্বয়মুক্তঃ— 'রসেন শয্যাহ স্বয়মভ্যুপাগতা কথা জনস্যাভিনবা বধূরিব'।

**१६. 'महतीयं खल्वनर्थपरम्परा'-उल्लिखिता अनर्थपरम्परा का भवति ?**

Scanned with CamScanner

১৬। 'মহতীয়ং খল্বনর্থপরম্পরা'—উল্লিখিতা অনর্থপরম্পরা কা ভবতি?

उत्तर: यौवनकालस्य विपद्वर्णनावसरे महामन्त्री शुकनासः चन्द्रापीडं अनर्थपरम्पराविषये उपदिष्टवान्। महामन्त्रिणा शुकनासेन चतुर्विधम् अनर्थम् उपदिष्टम्। तानि च अनर्थानि- गर्भेश्वरत्वम्, अभिनवयौवनत्वम्, अप्रतिमरूपत्वम्, अमानुषशक्तित्वञ्च। महाकविना विष्णुशर्मणा अपि तथैव उक्तम्-

*यौवनं धनसम्पत्तिः प्रभुत्वमविवेकिता।*
*एकैकमप्यनर्थाय किमु यत्र चतुष्टयम्।।*

যৌবনকালস্য বিপদ্বর্ণনাবসরে মহামন্ত্রী শুকনাসঃ চন্দ্রাপীড়ং অনর্থপরম্পরাবিষয়ে উপদিষ্টবান্। মহামন্ত্রিণা শুকনাসেন চতুর্বিধম্ অনর্থম্ উপদিষ্টম্। তানি চ অনর্থানি — গর্ভেশ্বরত্বম্, অভিনবযৌবনত্বম্, অপ্রতিমরূপত্বম্, অমানুষশক্তিত্বঞ্চ। মহাকবিনা বিষ্ণুশর্মণা অপি তথৈব উক্তম্—

*যৌবনং ধনসম্পত্তিঃ প্রভুত্বমবিবেকিতা।*
*একৈকমপ্যনর্থায় কিমু যত্র চতুষ্টয়ম্।।*

१७. 'अतिगहनं तमो यौवनप्रभवम्'-कः कं प्रति एवम् उक्तवान्? कथं यौवनप्रभवं तमो अतिगहनम्?

১৭। 'অতিগহনং তমো যৌবনপ্রভবম্'—কঃ কং প্রতি এবম্ উক্তবান্? কথং যৌবনপ্রভবং তমো অতিগহনম্?

उत्तर: महामन्त्री शुकनासः राजकुमारं चन्द्रापीडम् एवम् उक्तवान्।
यौवनप्रभवं तमो अतिगहनम्। यौवनजनितः अन्धकारः अतीव गम्भीरः। एवम् अन्धकारः सूर्यालोकेन प्रदीपालोकेन मणिप्रभावेन वा न दूरीभूतः भवति। अथ यौवनजनितः अन्धकारः अतिगहनः।
মহামন্ত্রী শুকনাসঃ রাজকুমারং চন্দ্রাপীড়ম্ এবম্ উক্তবান্।
যৌবনপ্রভবং তমো অতিগহনম্। যৌবনজনিতঃ অন্ধকারঃ অতীব গম্ভীরঃ। এবম্ অন্ধকারঃ সূর্যালোকেন প্রদীপালোকেন মণিপ্রভাবেন বা ন দূরীভূতঃ ভবতি। অথ যৌবনজনিতঃ অন্ধকারঃ অতিগহনঃ।

१८. 'अयञ्च ते कालः प्रतापमारोपयितुम्'-कस्मिन् प्रसङ्गे उक्तिरियम् पठिता?

১৮। 'অয়ঞ্চ তে কালঃ প্রতাপমারোপয়িতুম্'—কস্মিন্ প্রসঙ্গে উক্তিরিয়ম্ পঠিতা?

उत्तर: यौवराज्याभिषेकात् पूर्वं उज्जयिनीराजकुमारः चन्द्रापीडः महामन्त्रिणं शुकनासं श्रद्धां ज्ञापयितुं समागतः। विनीतं पुत्रोपमं राजकुमारम् अधिकतरं विनीतं कर्तुं शुकनासः चन्द्रापीडाय यौवनकालस्य सम्भाव्यविपद्विषये राजलक्ष्म्याः चरित्रविषये

Scanned with CamScanner

च समुचितम् उपदेशं प्रदत्तवान्। तदनन्तरं तस्मै दिग्विजययात्रायै उपदिश्य शुकनासः उक्तवान्– 'अयं च ते कालः प्रतापमारोपयितुम्' । यतः राज्ञां कृते शौर्यम् अवलम्बनीयम्। दुर्वलं राजानं प्रतिपक्षः कदापि न समीहते।

যৌবরাজ্যাভিষেকাৎ পূর্বং উজ্জয়িনীরাজকুমারঃ চন্দ্রাপীড়ঃ মহামন্ত্রিণং শুকনাসং শ্রদ্ধাং জ্ঞাপয়িতুং সমাগতঃ। বিনীতং পুত্রোপমং রাজকুমারম্ অধিকতরং বিনীতং কর্তুং শুকনাসঃ চন্দ্রাপীড়ায় যৌবনকালস্য সম্ভাব্যবিপদ্‌বিষয়ে রাজলক্ষ্মাঃ চরিত্রবিষয়ে চ সমুচিতম্ উপদেশং প্রদত্তবান্। তদনন্তরং তস্মৈ দিগ্বিজয়যাত্রায়ৈ উপদিশ্য শুকনাসঃ উক্তবান্— 'অয়ং চ তে কালঃ প্রতাপমারোপয়িতুম্'। যতঃ রাজ্ঞাং কৃতে শৌর্যম্ অবলম্বনীয়ম্। দুর্বলং রাজানং প্রতিপক্ষঃ কদাপি ন সমীহতে।

**१९. 'विरलाः हि तेषामुपदेष्टारः'–केषामुपदेष्टारः विरलाः कथं वा?**

**১৯। 'বিরলাঃ হি তেষামুপদেষ্টারঃ'—কেষামুপদেষ্টারঃ বিরলাঃ কথং বা?**

उत्तर: महामन्त्री शुकनासः चन्द्रापीडं गुरूजनानाम् उपदेशस्य गुरुत्वविषये एवम् उक्तवान्। क्षमतामदगर्विताः राजानः गुरूजनानाम् उपदेशं न गृह्णन्ति, परन्तु ते गुरूजनान् अवमानन्ति उपहसन्ति च। अथ आत्ममर्यादासम्पन्नाः गुरूजनाः नृपान् उपदेष्टुं न उत्सहन्ते। अथ नृपाणां उपदेष्टारः विरलाः।

মহামন্ত্রী শুকনাসঃ চন্দ্রাপীড়ং গুরুজনানাম্ উপদেশস্য গুরুত্ববিষয়ে এবম্ উক্তবান্। ক্ষমতামদগর্বিতাঃ রাজানঃ গুরুজনানাম্ উপদেশং ন গৃহ্নন্তি, পরন্তু তে গুরুজনান্ অবমানন্তি উপহসন্তি চ। অথ আত্মমর্যাদাসম্পন্নাঃ গুরুজনাঃ নৃপান্ উপদেষ্টুং ন উৎসহন্তে। অথ নৃপাণাং উপদেষ্টারঃ বিরলাঃ।

**२०. 'अपरिणामोपशमो दारुणलक्ष्मीमदः'–कः केन प्रसङ्गेन कं प्रति एवम् उक्तवान्?**

**২০। 'অপরিণামোপশমো দারুণলক্ষ্মীমদঃ'— কঃ কেন প্রসঙ্গেন কং প্রতি এবম্ উক্তবান্?**

उत्तर: महामन्त्री शुकनासः धनसम्पत्तिजनितमत्तताविषये कुमारं चन्द्रापीडं प्रति एवम् उक्तवान्।

अघटनघटनपटीयसी राजलक्ष्मी नृपेषु सम्पद्जनितां मत्ततां विसृज्य नृपान् विभ्रान्तान् करोति। धनमदगर्विता राजानः गुरुजनान् अवज्ञां कुर्वन्ति। किन्तु नृपेषु सृष्टा सम्पद्जनिता मत्तता गुरूपदेशं विना अन्यत् केनापि उपायेन न प्रशमिता भवति।

মহামন্ত্রী শুকনাসঃ ধনসম্পত্তিজনিতমত্ততাবিষয়ে কুমারং চন্দ্রাপীড়ং প্রতি এবম্ উক্তবান্।

অঘটনঘটনপটীয়সী রাজলক্ষ্মী নৃপেষু সম্পদ্‌জনিতাং মত্ততাং বিসৃজ্য নৃপান্ বিভ্রান্তান্ করোতি। ধনমদগর্বিতা রাজানঃ গুরুজনান্ অবজ্ঞাং কুর্বন্তি। কিন্তু নৃপেষু সৃষ্টা সম্পদ্‌জনিতা মত্ততা গুরূপদেশং বিনা অন্যৎ কেনাপি উপায়েন ন প্রশমিতা

Scanned with CamScanner

भवति।

२१. 'यौवनारम्भे च प्राय: शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धि:' –उक्तेः तात्पर्य किम्?

২১। 'যৌবনারম্ভে চ প্রায়ঃ শাস্ত্রজলপ্রক্ষালননির্মলাপি কালুষ্যমুপযাতি বুদ্ধিঃ'—উক্তেঃ তাৎপর্যং কিম্?

उत्तर: यौवनकाल: यद्यपि जीवनस्य कुसुमसमय: तथापि अस्मिन् समये काचित् विपदपि वर्तते। अस्मिन् समये युवजनानां भोगवासना प्रवला भवति। साधारणमनुष्यानां का कथा शास्त्रज्ञानेन आलोकिता: युवान: अपि विषयभोगानां प्रावल्यात् विपथगामिन: भवन्ति। शास्त्रज्ञानां बुद्धिमतां बुद्धि: यौवनारम्भे विषयभोगानां आकर्षणात् कालुष्यं प्राप्नोति। सद्य: यौवनप्राप्त: कुमार: चन्द्रापीड: एवम्प्रकारेण महामन्त्रिणा शुकनासेन उपदिष्ट:।

যৌবনকালঃ যদ্যপি জীবনস্য কুসুমসময়ঃ তথাপি অস্মিন্ সময়ে কাচিৎ বিপদপি বর্ততে। অস্মিন্ সময়ে যুবজনানাং ভোগবাসনা প্রবলা ভবতি। সাধারণমনুষ্যানাং কা কথা শাস্ত্রজ্ঞানেন আলোকিতাঃ যুবানঃ অপি বিষয়ভোগানাং প্রাবল্যাৎ বিপথগামিনঃ ভবন্তি। শাস্ত্রজ্ঞানাং বুদ্ধিমতাং বুদ্ধিঃ যৌবনারম্ভে বিষয়ভোগানাং আকর্ষণাৎ কালুষ্যং প্রাপ্নোতি। সদ্যঃ যৌবনপ্রাপ্তঃ কুমারঃ চন্দ্রাপীড়ঃ এবম্প্রকারেণ মহামন্ত্রিণা শুকনাসেন উপদিষ্টঃ।

**२२. 'अकारणञ्च भवति दुष्प्रकृतेरन्वय: श्रुतं वाविनयस्य'–कश्च वक्ता? स: कं प्रति कथं वा एवमुक्तवान्?**

**২২। 'অকারণঞ্চ ভবতি দুষ্প্রকৃতেরন্বয়ঃ শ্রুতং বাবিনয়স্য'—কশ্চ বক্তা? সঃ কং প্রতি কথং বা এবমুক্তবান্?**

**उत्तर:** महामन्त्री शुकनास: अत्र वक्ता।

स: राजकुमारं चन्द्रापीडं प्रति एवम् उक्तवान्।

यौवराज्याभिषेकात् पूर्वं समागतं चन्द्रापीडं मनुष्यप्रकृतिविषये आचार्य: शुकनास: अवदत् यत् दुश्चरितानां कृते सद्वंशस्य शास्त्रज्ञानस्य वा कापि भूमिका न विद्यते। सद्वंशे जात: दुष्ट: पण्डित: मूर्ख: यथा वा भवतु स: हि दुष्ट:। यत: स्वभाव: अपरिवर्तनीय:।

মহামন্ত্রী শুকনাসঃ অত্র বক্তা। সঃ রাজকুমারং চন্দ্রাপীড়ং প্রতি এবম্ উক্তবান্। যৌবরাজ্যাভিষেকাৎ পূর্বং সমাগতং চন্দ্রাপীড়ং মনুষ্যপ্রকৃতিবিষয়ে আচার্যঃ শুকনাসঃ অবদৎ যৎ দুশ্চরিতানাং কৃতে সদ্বংশস্য শাস্ত্রজ্ঞানস্য বা কাপি ভূমিকা ন বিদ্যতে। সদ্বংশে জাতঃ দুষ্টঃ পণ্ডিতঃ মূর্খঃ যথা বা ভবতু সঃ হি দুষ্টঃ। যতঃ স্বভাবঃ

Scanned with CamScanner

অপরিবর্তনীয়ঃ।

२३. 'राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मी'-तात्पर्यं व्याख्येयम्।

২৩। 'রাজ্যবিষবিকারতন্দ্রীপ্রদা রাজলক্ষ্মী'—তাৎপর্যং ব্যাখ্যেয়ম্।

उत्तर: दुराचारायाः राजलक्ष्म्याः चरित्रमत्र वर्णितं महामन्त्रिणा शुकनासेन। राजलक्ष्मी धनसम्पदां कारणभूतेन राज्याधिपतित्वरूपेण विषविकारेण नृपान् सदैव मोहग्रस्तान् करोति। सर्पादीनां तीव्रविषेण यथा सर्पदष्टः व्यक्तिः विकारग्रस्तः सन् मृत्युं प्राप्नोति तथैव राजाधिपत्यस्य उन्मादनावशात् राजानः धनैश्वर्याणां मोहात् विकारतां प्राप्य तन्द्राच्छन्नाः भवन्ति। हिताहितज्ञानशून्याः ते राजानः विनाशं प्राप्नुवन्ति। एवं राजलक्ष्मी नृपाणां विनाशं साधयति।

উঃ দুরাচারায়াঃ রাজলক্ষ্ম্যাঃ চরিত্রমত্র বর্ণিতং মহামন্ত্রিণা শুকনাসেন। রাজলক্ষ্মী ধনসম্পদাং কারণভূতেন রাজ্যাধিপতিত্বরূপেণ বিষবিকারেণ নৃপান্ সদৈব মোহগ্রস্তান্ করোতি। সর্পাদীনাং তীব্রবিষেণ যথা সর্পদষ্টঃ ব্যক্তিঃ বিকারগ্রস্তঃ সন্ মৃত্যুং প্রাপ্নোতি তথৈব রাজাধিপত্যস্য উন্মাদনাবশাৎ রাজানঃ ধনৈশ্বর্যাণাং মোহাৎ বিকারতাং প্রাপ্য তন্দ্রাচ্ছন্নাঃ ভবন্তি। হিতাহিতজ্ঞানশূন্যাঃ তে রাজানঃ বিনাশং প্রাপ্নুবন্তি। এবং রাজলক্ষ্মী নৃপাণাং বিনাশং সাধয়তি।

२४. 'अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः'- उक्तेः कोऽर्थः ?

২৪। 'অনুজ্ঝিতধবলাপি সরাগৈব ভবতি যূনাং দৃষ্টিঃ'—উক্তেঃ কোঽর্থঃ ?

उत्तर: अनुज्झितधवलापि धवलताम् अपरित्यज्य अपि युवचित्तम् सरागं अनुरागपूर्णं भवति। रागः रक्तिमता लालसा। विद्याशिक्षयाः आलोकप्राप्ताः अपि राजानः वित्तवैभवसंयोगात् लालसायुक्ताः भवन्ति। सम्पद्तृष्णावशात् यूनां दृष्टिःसदैव अनुरागपूर्णा भवति। युवानः विषयभोगेषु प्रवर्तन्ते।

অনুজ্ঝিতধবলাপি ধবলতাম্ অপরিত্যজ্য অপি যুবচিত্তম্ সরাগং অনুরাগপূর্ণং ভবতি। রাগঃ রক্তিমতা লালসা। বিদ্যাশিক্ষায়াঃ আলোকপ্রাপ্তাঃ অপি রাজানঃ বিত্তবৈভবসংযোগাৎ লালসাযুক্তাঃ ভবন্তি। সম্পদ্তৃষ্ণাবশাৎ যূনাং দৃষ্টিঃ সদৈব অনুরাগপূর্ণা ভবতি। যুবানঃ বিষয়ভোগেষু প্রবর্তন্তে।

२५. 'कष्टमनञ्जनवर्तिसाध्यपरमैश्वर्यतिमिरानधत्वम्'- कः कं प्रति एवम् उपदिष्टवान् ? तात्पर्यञ्च किम् ?

২৫। 'কষ্টমনঞ্জনবর্তিসাধ্যপরমৈশ্বর্যতিমিরান্ধত্বম্'— কঃ কং প্রতি এবম্ উপদিষ্টবান্ ? তাৎপর্যঞ্চ কিম্ ?

उत्तर: महामन्त्री शुकनासः राजकुमारं चन्द्रापीडं प्रति एवमुक्तवान्।

यौवनागमे यूनां सम्पद्तृष्णा प्रवला भवति। तिमिररोगग्रस्ताः जनाः सर्वं अन्धकारमयं

Scanned with CamScanner

पश्यन्ति। धममदगर्वेण युवान: सर्वं जगत् भोग्यरूपेण विवेचन्ति। तिमिररोगजनितम् अन्धत्वम् अञ्जनप्रलेपेन प्रशम्यते, किन्तु धनमदगर्वजनितम् अन्धत्वं न केनापि उपायेन प्रशमनं प्राप्यते।

মহামন্ত্রী শুকনাসঃ রাজকুমারং চন্দ্রাপীড়ং প্রতি এবমুক্তবান্। যৌবনাগমে যূনাং সম্পদ্‌তৃষ্ণা প্রবলা ভবতি। তিমিররোগগ্রস্তাঃ জনাঃ সর্বং অন্ধকারময়ং পশ্যন্তি। ধমমদগর্বেণ যুবানঃ সর্বং জগৎ ভোগ্যরূপেণ বিবেচন্তি। তিমিররোগজনিতম্ অন্ধত্বম্ অঞ্জনপ্রলেপেন প্রশম্যতে, কিন্তু ধনমদগর্বজনিতম্ অন্ধত্বং ন কেনাপি উপায়েন প্রশমনং প্রাপ্যতে।

**२६. 'सततमूलमन्त्रशम्यो विषमो विषयविषास्वादमोह: '-क: कं कथं वा एवमुक्तवान् ?**

**২৬। 'সততমূলমন্ত্রশম্যো বিষমো বিষয়বিষাস্বাদমোহঃ'—কঃ কং কথং বা এবমুক্তবান্?**

**उत्तर:** राज्याभिषेकात् पूर्वं समागतम् अधीतविद्यं विनीतं चन्द्रापीडं प्रति महामन्त्रिण: शुकनासस्य अयमुपदेश:।

युवान: राजकुमारा: विषयभोगेन मोहग्रस्ता: भवन्ति। विषयभोग: विषस्वरूप:। राजान: विषस्वरूपे विषयभोगे आच्छन्ना: सन्त:मूलमन्त्ररूपेण विषयभोगं जपन्ति। न केनापि औषधेन मन्त्रेण वापि नृपाणां विषयभोगेच्छा निवृता भवति।

রাজ্যাভিষেকাৎ পূর্বং সমাগতম্ অধীতবিদ্যং বিনীতং চন্দ্রাপীড়ং প্রতি মহামন্ত্রিণঃ শুকনাসস্য অয়মুপদেশঃ।

যুবানঃ রাজকুমারাঃ বিষয়ভোগেন মোহগ্রস্তাঃ ভবন্তি। বিষয়ভোগঃ বিষস্বরূপঃ। রাজানঃ বিষস্বরূপে বিষয়ভোগে আচ্ছন্নাঃ সন্তঃ মূলমন্ত্ররূপেণ বিষয়ভোগং জপন্তি। ন কেনাপি ঔষধেন মন্ত্রেণ বাপি নৃপাণাং বিষয়ভোগেচ্ছা নিবৃতা ভবতি।

**२७. 'नाल्पमुदेष्टव्यम्' इत्यस्य पदस्य सन्धिविच्छेद: कार्य:।**

**২৭। 'নাল্পমুদেষ্টব্যম্' ইত্যস্য পদস্য সন্ধিবিচ্ছেদঃ কার্যঃ।**

**उत्तर:** न + अल्पम् + उपदेष्टव्यम्।

ন + অল্পম্ + উপদেষ্টব্যম্।

**२८. कादम्बरी काव्यस्य टीकाकारद्वयस्य नाम कार्यम्।**

**২৮। কাদম্বরী কাব্যস্য টীকাকারদ্বয়স্য নাম কার্যম্।**

**उत्तर:** कादम्बरीकाव्यमुपजीव्य वहव: टीका: सम्पादिता:। तेषु टीकाकारेषु अन्यतमौ पण्डितप्रवर: जीवानन्द विद्यासागर: महामहोपाध्याय:हरिदाससिद्धान्तवागीशश्च।

কাদম্বরীকাব্যমুপজীব্য বহবঃ টীকাঃ সম্পাদিতাঃ। তেষু টীকাকারেষু অন্যতমৌ পণ্ডিতপ্রবরঃ জীবানন্দ বিদ্যাসাগরঃ মহামহোপাধ্যায়ঃ হরিদাসসিদ্ধান্তবাগীশশ্চ।

Scanned with CamScanner

२९. हरिदाससिद्धान्तवागीशस्य टीका का नामिका भवति ?

২৯। হরিদাসসিদ্ধান্তবাগীশস্য টীকা কা নামিকা ভবতি?

उत्तर: महामपाध्याय हरिदाससिद्धान्तवागीशमहोदयेन कादम्बपीराव्यमाश्रित्य 'कल्पलता' टीका रचिता।

মহামহোপাধ্যায় হরিদাসসিদ্ধান্তবাগীশমহোদয়েন কাদম্বরীকাব্যমাশ্রিত্য 'কল্পলতা' টীকা রচিতা।

३०. कादम्बरीकाव्यमाश्रित्य मुख्याः टीकाः काः भवन्ति ?

৩০। কাদম্বরীকাব্যমাশ্রিত্য মুখ্যাঃ টীকাঃ কাঃ ভবন্তি?

उत्तर: कादम्बरीकाव्यामाश्रित्य वहवः टीकाग्रन्थाः विरचिताः।

मोगलसम्राजः आकवरस्य समयकाले रचिता महामहोपाध्यायस्य भानुचन्द्रगणिमहाभागस्य टीका प्रसिद्धा।

एतद्व्यतीतं पण्डितप्रवरस्य जीवानन्दविद्यासागरस्य टीका, हरिदास सिद्धान्तवागीशस्य 'कल्पलता' टीका, काशीहिन्दुविश्वविद्यालयस्य पण्डितप्रवरेण कृष्णमोहनशास्त्रीमहाभागेन विरचिता 'चन्द्रकला विद्योतिनी' टीका प्रसिद्धा।

কাদম্বরীকাব্যামাশ্রিত্য বহবঃ টীকাগ্রন্থাঃ বিরচিতাঃ।

মোগলসম্রাজঃ আকবরস্য সময়কালে রচিতা মহামহোপাধ্যায়স্য ভানুচন্দ্রগণিমহাভাগস্য টীকা প্রসিদ্ধা।

এতদ্ব্যতীতং পণ্ডিতপ্রবরস্য জীবানন্দবিদ্যাসাগরস্য টীকা, হরিদাস সিদ্ধান্তবাগীশস্য 'কল্পলতা' টীকা, কাশীহিন্দুবিশ্ববিদ্যালয়স্য পণ্ডিতপ্রবরেণ কৃষ্ণমোহনশাস্ত্রীমহাভাগেন বিরচিতা 'চন্দ্রকলা বিদ্যোতিনী' টীকা প্রসিদ্ধা।

३१. कादम्बरी काव्यस्य उत्सः कः भवति ?

৩১। কাদম্বরী কাব্যস্য উৎসঃ কঃ ভবতি?

उत्तर: कादम्बरीकाब्यम् महककविना गुणाढ्येन पैशाची प्राकृतभाषायां विरचितायाः वृहत्कथायाः कथाभागम् आश्रित्य वाणभट्टेण विरचितम्। सोमदेवभट्टविरचितः कथासरित्सागरः अपि कादम्बरी काव्यस्य उत्सरूपेण विवेचितः।

কাদম্বরীকাব্যম্ মহককবিনা গুণাঢ্যেন পৈশাচী প্রাকৃতভাষায়াং বিরচিতায়াঃ বৃহৎকথায়াঃ কথাভাগম্ আশ্রিত্য বাণভট্টেণ বিরচিতম্। সোমদেবভট্টবিরচিতঃ কথাসরিৎসাগরঃ অপি কাদম্বরী কাব্যস্য উৎসরূপেণ বিবেচিতঃ।

३२. वाणभट्टाणुसारं धूर्तैः राजा कथं प्रतार्य्यते ?

৩২। বাণভট্টাণুসারং ধূর্তৈঃ রাজা কথং প্রতার্য্যতে?

उत्तर: धूर्तजनाः स्वार्थपरायणाः। स्वार्थसिद्ध्यर्थं मांसलोभिशकुनिसदृशाः धूर्ताः राजानमाश्रित्य

वर्तन्ते। राज्ञः प्रीत्यर्थं शास्त्रनिषिद्धाः दोषाः गुणरूपेण राजनि ते आरोपयन्ति। यथा द्यूतक्रीडा आमोदाय, परस्त्रीगमनं विचक्षणता, स्वपत्नीत्यागम् अनासक्तिः, गुरुजनानां उपदेशं प्रति अवहेला स्वाधीनता, गणिकासक्तिः आनन्दाय, अपराधिनं प्रति दुर्वलता महानुभवता, स्वेच्छाचारिता प्रभुत्वम्–इत्येवं वहुशः धूर्ताः राजनि मिथ्यामहत्वम् आरोप्य राजानम् अधोगतिं प्रापयन्ति।

ধূর্তজনাঃ স্বার্থপরায়ণাঃ। স্বার্থসিদ্ধ্যর্থং মাংসলোভিশকুনিসদৃশাঃ ধূর্তাঃ রাজানমাশ্রিত্য বর্তন্তে। রাজ্ঞঃ প্রীত্যর্থং শাস্ত্রনিষিদ্ধাঃ দোষাঃ গুণরূপেণ রাজনি তে আরোপয়ন্তি। যথা দ্যূতক্রীড়া আমোদায়, পরস্ত্রীগমনং বিচক্ষণতা, স্বপত্নীত্যাগম্ অনাসক্তিঃ, গুরুজনানাং উপদেশং প্রতি অবহেলা স্বাধীনতা, গণিকাসক্তিঃ আনন্দায়, অপরাধিনং প্রতি দুর্বলতা মহানুভবতা, স্বেচ্ছাচারিতা প্রভুত্বম্—ইত্যেবং বহুশঃ ধূর্তাঃ রাজনি মিথ্যামহত্বম্ আরোপ্য রাজানম্ অধোগতিং প্রাপয়ন্তি।

Scanned with CamScanner